न्यायतिलकम्

१५६६

८ प०

पत्रे ८

ना॰
२

ॐ श्रीगणेशाय नमः। नत्वा तं गणवदनं बालाहार्य्यः कृपानिधिः। करोति न्यायतिलकं बालव्यु
त्पत्तिसिद्धये। गुणवद्द्रव्यं द्रव्यकर्म्मान्यसामान्यवान् गुणः। कर्म्मत्वजातिमत्कर्म्म नित्य
मनेकसमवेतं सामान्यं। स्वतो व्यावृत्ता विशेषाः। नित्यसंबंधः समवायः। एते भावाः। अ
न्येऽभावाः। उभये पदार्थाः। सहकारिसमवधानं शक्तिः। तद्भिन्नत्वे सति तद्गतभूयोधर्म्म
वत्वं सादृश्यं। गंधवती क्षितिः। शीतं जलं। उष्णं तेजः। रूपहीनस्पर्शवान् वायुः। शब्दवदा
काशं। अतीतादिव्यवहारहेतुः कालः। प्राच्यादिव्यवहारहेतुर्दिक्। ज्ञानवानात्मा। सुखा
दिसाक्षात्कारकारणमिन्द्रियं मनः। इति द्रव्याणि नवधा। तेजोभाववत्तमः छायाच। सर्वाणि
नः क्षित्यप्तेजोवायवो नित्याः परमाणुवत्। द्व्यणुकादयः शरीरेन्द्रियविषयरूपास्त्वनित्याः।
मनुष्यादिवरुणादिसूर्यादिपिशाचादयः पार्थिवाप्यतैजसवायव्यदेहाः। घ्राणरसनच
क्षुस्त्वक्श्रोत्रमनांसीन्द्रियाणि तत्र तानि पार्थिवाप्यतैजसवायव्यानि कर्णावच्छिन्नखम्
वः। मृदादिसिंधुहिमादिवह्न्यादिव्यजनपवनादयो विषयाः। प्राणो वायुरेव। आत्मा द्विधा २॥
जीवेश्वरभेदात्। जीवः प्रतिशरीरं भिन्नः। ईश्वर एक एव। आकाशकालदिगात्मनां

भवोनित्यास्च आकाशादिकमेकैकं मनोनंतमणुश्च इतिद्रव्याण्युक्तानि चक्षुर्ग्राह्यो
विशेषगुणोरूपं शुक्लनीलपीतलोहितहरितकपिशचित्रभेदात्सप्तविधं रसनग्रा
ह्योगुणोरसः मधुराम्ललवणकटुकषायतिक्तभेदात् षोढाः घ्राणग्राह्योगुणो
गंधः द्विधा सुरभिरसुरभिश्चत्वग्ग्राह्योविशेषगुणःस्पर्शः शीतोष्णानुष्णाशीत
भेदात्त्रिविधा एतेपाकजाअपाकजाश्च पाकजाअनित्या गंधस्त्वपाकजोजले रूपस्य
र्शौतेजसि स्पर्शोवायौ एतेषांनित्याजलादिपरमाणुव्यतिरिक्तेषु जलादिपरमा
णुषुनित्याः एकादिव्यवहारहेतुःसंख्या एकत्वंनित्यगतंनित्यं अन्यासंख्याअनित्या
महदादिव्यवहारहेतुःपरिमाणं चतुर्द्धा महत्वमणुत्वं दीर्घत्वंह्रस्वत्वभेदात् पृथक्त्व
व्यवहारहेतुः पृथक्त्वंनित्यगतंएकपृथक्त्वंनित्यं अन्यदेकपृथक्त्वं..... संयुक्तव्यव
हारहेतुःसंयोगः संयोगनाशकोगुणोविभागः एतौअन्यतरकर्मजौ उभयक
र्मजौच यथाश्येनेनपर्वतसंयोगविभागौ मल्लसंयोगविभागौ संयोगजःसंयोगः
हस्तपुस्तकसंयोगजन्यकायपुस्तकसंयोगः विभागजविभागः हस्तपुस्तकविभा स्त

ना॰ २

2

गजन्यकार्यद्रव्यकविभागः कपालद्वयविभागजन्यकपालाकाशविभागश्चेति संयो
गविभागौ द्विधा परव्यवहारहेतुः परत्वं अपरव्यवहारहेतुरपरत्वं ते द्विधा कालकृते दिक्कृते च
कालके परत्वापरत्वे ज्येष्ठकनिष्ठयोः दैशिके दूरान्तिकस्थयोः आद्यपतनासमवायिस
मवेतं आद्यपतनानन्यथासिद्धनियतपूर्ववृत्ति गुरुत्वं आद्यस्पन्दनासमवायिसमवेतं आ
द्यस्पंदनानन्यथासिद्ध नियतपूर्ववृत्ति द्रवत्वं तद्द्विविधं सांसिद्धिकं नैमित्तिकं च सांसि
द्धिकं जले नैमित्तिकं घृतादौ सुवर्णे च चूर्णादिपिंडीभावहेतुर्गुणः स्नेहः श्रोत्रग्राह्यो गु
णः शब्दः ध्वनिवर्णभेदाद्द्विधा संयोगजविभागजशब्दजभेदात्त्रिधा बुद्धिर्ज्ञानं स्मृत्य
नुभूतिभेदाद्द्विधा संस्कारजन्याया तदन्यान्याप्रमा च इदं रजतमित्याकाररजतत्ववद्वि
शेष्यकरजतत्वप्रकारकानुभूतिराधाररजतभाववद्विशेष्यकरजतत्वप्रकारिका इदं
रजतमित्याकारकानुभूतिर्द्वितीया प्रमा प्रत्यक्षानुमित्युपमितिशाब्दभेदाच्चतुर्द्धा ज्ञाना
करणकज्ञानं द्विधा निर्विकल्पसविकल्पकस्वरूपा संयोगसंयुक्तसमवाय संयुक्त २
समवेतसमवाय समवाय समवेतसमवाय विशेषणतासामान्यलक्षणाज्ञानल

त्वाणायोगाजधर्म्मिरूपनवविधेंद्रियार्थसंनिकर्षजन्यागन्त्यन्तरभ्रमा व्याप्तिविशिष्टपक्षधर्म्म
ताज्ञानजन्यज्ञानमनुमितिः अतिदेशवाक्यार्थज्ञानजन्यसंज्ञासंज्ञिसंबंधज्ञानमुप
मितिः शाब्दजन्यप्रमितिः यथार्थभ्रमत्वासाधारणधर्म्मज्ञानजन्या साधारणधर्मज्ञा
नजन्यसंशयविपर्य्यासज्ञानव्याप्यारोपजन्यव्यापकारोपरूपात्रिधा धर्म्मिजन्यो गुणवि
शेषः सुखं अर्थिजन्यगुणविशेषो दुःखं सुखतत्साधकज्ञानजन्यगुणविशेषद्दुः
खतत्साधकज्ञानजन्यगुणविशेषो द्वेषः इष्टहितसाधनज्ञानजन्यप्रवृत्तिनिवृत्तिस्वरू
पः प्रयत्नः विहितक्रियाजन्यगुणविशेषो धर्मः निषिद्धक्रियाजन्यगुणविशेषोऽध
र्म्मः वेगस्थितिस्थापकभावनात्मकः संस्कारः रूपादयः संस्कारांतागुणाः उत्क्षेप
णापक्षेपणाकुंचनप्रसारणगमनानीति पंचैव कर्म्माणि परापररूपं सामान्यं स्वातिरिक्तव्या
वर्त्तकाश्चान्त्यविशेषाः नित्यद्रव्यगाः अवयवावयविगुणगुणिक्रियाक्रियावत् जाति
व्यक्तिविशेषनित्यद्रव्याणामयुतसिद्धसंबंधविशेषः समवायो नित्यः इदं भविष्यतीति नष्टमिति नास्ति

ना॰ २ 3

घटमिदंनेतिप्रतीतिसिद्धःध्वंसप्रागभावात्यंताभावश्चान्योन्याभावरूपाश्चभावाः ध्वंसोनित्योऽस्मा
द्योऽनन्यः द्वितीयोऽविनाशी एतेद्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः पदा
र्थाउक्ताः अथप्रमाणानि प्रत्यक्षानुमानोपमानशब्दाः प्रत्यक्षप्रमाकरणंप्रत्यक्षंसाप्र
माउक्ताव्यापारवत्कारणंकरणंकारणंकार्याव्यवहितप्राक्क्षणेकार्याधिकरणवृत्त्य
भावाप्रतियोग्यवश्यकल्प्यनियतपूर्ववृत्तिताकान्यत्वस्वरूपान्यथाऽसिद्धिशून्यमेत
त्समवायिअसमवायिनिमित्तभेदात्त्रिधा समवायेनयत्रकार्यमवस्थि
तंतत्समवायिकारणंकार्यसमवायिकार्यसमवायिसमवेतंकार्यसमवायि
समवायिसमवेतंवाकारणं असमवायिकारणं एतदुभयान्यनिमित्तं आद्यपटादौ
तंत्वादि द्वितीयेतंतुसंयोगादिस्तृतीयेतुर्यादिनिमित्तं प्रमायाः साक्षात्कारस्वरूपायाः
समवायिकारणमात्मा असमवायिकारणं आत्ममनःसंयोगः इंद्रियमिंद्रियार्थ २
सन्निकर्षः आलोकसंयोगः महत्वउद्भूतरूपंघटादिरूपोविषयः कालादिचनिमि

त्नं एतेषु इंद्रियसंयोगादिद्वारा प्रत्यक्षप्रमां जनयति तथाहि चक्षुरादिसंयोगेन संबंध
स्य घटादेर्द्रव्यस्य संयुक्तसमवायेन संबद्धरूपक्रियादेः संयुक्तसमवेतसमवायेन सं
बद्धरूपत्वक्रियात्वजातेः श्रुतिः समवायेन संबद्धशब्दस्य समवेतसमवायेन संबद्ध
शब्दस्य समवेतजातेः संयोगसंयुक्तसमवायसंयुक्तसमवेतसमवायसमवायसमवे
तसमवेतसमवायात्मकसंबद्धविशेषणतासन्निकर्षेण संबद्धाभावस्य प्रत्यक्षं जनय
ति एतल्लौकिकप्रत्यक्षसामग्रीसहितसामान्यज्ञानेन सामान्याश्रयपयावत् प्रत्यक्षलौ
भाषकारकेन तदाश्रयविशेष्यकप्रत्यक्षं योगजधर्मस्तु हि न्येन अतीतानागतवर्तमान
सकलवस्तुविषयकं प्रत्यक्षं जनयति एतदलौकिक एतद्द्विविधप्रमाकरणमिंद्रियं प्रत्य
क्षमितिसिद्धं इति प्रत्यक्षं व्याख्यातं अनुमितिकरणमनुमानं धूमो वह्निव्याप्य इतिज्ञानं
एतद्वह्निव्याप्यधूमवान् इतिज्ञानद्वारा पर्वतो वह्निमान् इतिज्ञानं जनयति इदमनुमितिः व्या
प्तिज्ञानं करणं वह्निव्याप्यधूमवान् पर्वत इतिज्ञानं परामर्शः अयं व्यापारः स्वजन्यायः
स्वजन्यजनकः सव्यापारः व्याप्तिज्ञानजन्यः तज्जन्यानुमितिजनकः परामर्श इति व्या

धूमवान्वह्नेर्वतो वह्निमान्नभवतीत्यप्रतीतेः किंतु घटादिमान्नभवतीति प्रतीतेश्च धूमसमानाधिकरणे
भेदो घटादिमद्भेदस्तत्प्रतियोगी घटादिमांस्तन्निष्ठप्रतियोगितावच्छेदकं घटादिकम् न तु वह्निरूपं साध्यं तत्सामानाधिक
रण्यं धूमे व्याप्तिः २

ति
५

पारउच्यते व्याप्तिर्योयस्य देशकालाभ्यां समो न्यूनोपि वा भवेत् स व्याप्यो व्यापकस्तस्य समो
वाभ्यधिकोपि वा हेतुसमानाधिकरणभेदप्रतियोगितानवच्छेदकसाध्यसामानाधिकरण्यं व्या
प्तिः साध्याभाववदवृत्तित्वं साध्यवद्भिन्नवृत्ति साध्याभाववदवृत्तित्वं सकलसाध्याभाववन्निष्ठा वह्नौ साध्ये कृदादि:
भावप्रतियोगि साध्यवदन्यावृत्तित्वं व्याप्ति अन्वयाधिकसाध्यसंबंधः हेतुसमानाधि
करणाभावाप्रतियोगि साध्यसामानाधिकरण्यं वा अव्यभिचरितत्वं साध्यासामानाधिक
रण्यानधिकरणत्वं व्यभिचारज्ञानाभावसहितसहचारज्ञानेन व्याप्तिर्ज्ञायते व्यभिचा
रज्ञानं च साध्याभाववद्वृत्तिरिति ज्ञानं हेतुसमानाधिकरणाभावप्रतियोगि साध्यमिति ज्ञानं
वा धूमो वह्निव्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यात् इति तर्केण तत्त्वतो वा व्यभिचारज्ञान
निवृत्तिः अनभिमतकरणत्वमिति वारणाय पक्षतापि कारणमनुमितौ या च साध्यनिश्च
यनिवर्त्यसंदेहः सिसाधयिषाविरहविशिष्टसिद्ध्यभावः साध्यव्यापकत्वे सति साधनाव्या
पकउपाधिः धूमवान्वह्नेरित्यत्र धूमसमानाधिकरणाभावाप्रतियोगि वह्निसमाना
धिकरणाभावाप्रतियोगि हेतुसमानाधिकरणभेदप्रतियोगितावच्छेदकविशिष्टसाध्य ४

समानाधिकरण्यं आर्द्रेंधनसंयोगः तच्चानुमानं केवलान्वयिकेवलव्यतिरेकि अन्वयव्यति
रेकि चेति केवलान्वयिसाधकं केवलान्वयि यथा घटोभिधेयो ज्ञेयत्वादित्यादिव्याहृत्या
दिव्याहृत्यादिसाधकं केवलव्यतिरेकि यथा इच्छा इतरेभ्यो भिद्यते गुणवत्त्वादिति अन्वय
व्यतिरेकदृष्टान्तवान् अन्वयव्यतिरेकि यथा पर्वतो वह्निमान् धूमात् यो यो धूमवान्
स सोऽग्निमान् यथा महानसः यो अनग्निः स निर्धूम इति यथा महाह्रदः अनुमानं द्वि
विधं स्वार्थं परार्थं च आद्यं भूयोदर्शनाद्व्याप्तिग्रहोनन्तरं पर्वतादौ धूमदर्शनोद्बुद्धसंस्कारस्य
व्याप्तिस्मरणानन्तरं वह्निव्याप्यधूमवांश्चायमिति परामर्शात् वह्निमान् पर्वत इति ज्ञानं इति
यज्ज्ञानं तद्द्वितीयं वादितोन्यायवशाद्धृत्प्रयोज्यपरामर्शी नयदज्ञानं तत्त्वायमनुमितिचर
मकारणलिंगपरामर्शप्रयोजकशाब्दजनकवाक्यव्युत्क्रमोच्चरितप्रतिज्ञादिभिन्नप्रति
ज्ञादियं चकं वा प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि अवयवाः अनुमितिचरमकार
णलिंगपरामर्शप्रयोजकशाब्दधीजनकशाब्दधीजनकवाक्यं प्रतिज्ञा यथा घटोभयश्चट

त्रि·घ
5

कभागद्वयावृत्तित्वन्यायांतर्गतवाक्यावयवाः साध्यवत्पक्षबोधकानुपूर्वीविशेषविशिष्टवा
क्यं प्रतिज्ञायं च पक्षं तद्धेतुबोधकानुपूर्वीविशेषविशिष्टवाक्यं हेतुः व्याप्तिबोधकानुपूर्वी
विशेषविशिष्टव्याप्तिमदुदाहरणं व्याप्यहेतुमत्पक्षबोधकानुपूर्वीविशेषविशिष्टवा॰
क्यं प्रतिज्ञायं च पक्षं तद्धेतुबोधकानुपूर्वीविशेषविशिष्टवाक्यं हेतुः व्याप्तिबोधकानुपूर्वी
विशेषविशिष्टवाक्यं प्रतिज्ञायं च पक्षं तद्धेतुबोधकानुपूर्वीविशेषविशिष्टवाक्यं हेतुः मदु
दाहरणं व्याप्यहेतुमत्पक्षबोधकानुपूर्वीविशेषविशिष्टवाक्यमुपनयः अबाधितत्वा
सत्प्रतिपक्षितत्वात् पर्यकसाध्यव्याप्यहेतुमत्ताज्ञानजन्यज्ञानविषयत्वविशिष्टसाध्य
वत्पक्षबोधकानुपूर्वीविशेषविशिष्टवाक्यं निगमनं एवंविधप्रतिज्ञाद्युपनयनसोऽव
यवाः अथ हेत्वाभासाः पक्षः साध्यवान् साध्यव्याप्यहेतुमांश्च इत्यनुमितिप्रतिबंधक
यथार्थज्ञानविषयाः यस्मिन्सते यस्मिन्हेतौ यावन्तो दोषास्तावदन्यतमवावासव्यभि ५
चारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः साधारणासाधारणानुपसंहारिणः सव्यभिचा

णः साध्याभाववद्वृत्तिराद्यः सर्वसपक्षविपक्षव्यावृत्तो द्वितीयः सर्वपक्षकोनुपसंहा
रीयथासन्नदेशावृत्तिसाध्यकाधिकदेशावृत्तिर्हेतुः धूमवान्वह्नेरित्यादिपक्षमात्रवृत्ति
हेतुः शब्दोनित्यः शब्दत्वादित्यादि सर्वमनित्यंप्रमेयत्वादित्यादि साध्यासामानाधिक
रणोविरुद्धः गौरश्वत्वादित्यादि साध्यनिश्चयविषयपक्षकः पक्षतावच्छेदकाभाववत्
पक्षकोवाहेत्वाश्रयासिद्धः अयोगोलकोपवह्निचभाववद्रूदः स्वरूपासिद्धिः गगनार
विंदसुरभिअरविंदत्वादित्यादि हेत्वभाववत्पक्षकोहेतुः स्वरूपासिद्धः ह्रदोवह्निमान्धू
मादित्यादिप्रमाणभावेनव्याप्यतावच्छेदकत्वसमानाधिकरणधर्मान्तरवदितहेतुतावच्छे
दकत्वेनसोपाधिकत्वेनचव्याप्यभाववद्धेतुर्व्याप्यत्वासिद्धः घटादिः क्षणिकः सत्वात् वनप
दत्ववत् वह्निमान्नीलधूमात् धूमवान्वह्नेरित्यादि साध्यव्याप्यवत्तापरामर्शका
लीनसाध्याभावव्याप्यवत्तापरामर्शविषयोहेतुः साध्याभावव्याप्यहेतुमत्पक्षकोवा
सत्प्रतिपक्षोयथा शब्दोनित्यः श्रावणत्वात् इतिस्थापनायांशब्दोअनित्यः कार्यत्वा
त् घटवत् इतिप्रतिहेतुः साध्याभाववत्पक्षकादिमहेतुः वाधितः शब्दश्चाक्षुषः प्रमे

ति॰ ५

6

यत्नात् घटवत् अनुमानं व्याख्याय उपमितिकरणमनुमानं कश्चिद्गवयशब्दार्थजिज्ञा
सुः कीदृशो गवयशब्दवाच्य इति पृष्टेन केनचिद्वनचरितगोसदृशो गवयपदवाच्य इति
श्रुत्वा तदर्थज्ञानोत्तरं अरण्यं गतो गोसदृशपिंडं दृष्ट्वा गोसदृशो गवयपदवाच्य इति
वाक्यार्थं स्मरन् गवयो गवयपदवाच्यः इति निश्चिनोति स एव निश्चयः उपमितिस्तत्र
करणं गोसादृश्यविशिष्टपिंडदर्शनं वाक्यार्थस्मृतिर्व्यापारः इति सादृश्यविशिष्टपिंड
दर्शनं उपमानमिति सिद्धं इत्युपमानं व्याख्याय शाब्दप्रमितिकरणं शब्दः तथाहि गामा
नय इत्यत्र प्रातिपदिकद्वितीयाधात्वाख्यातैर्गोत्वविशिष्टकर्मत्वानयनकृतीनामुपस्थि
स्तत्र गोनिष्ठकर्मतानिरूपकानयनानुकूलकृतिमान् इति बोधः यातेन तत्र गवादिपद
ज्ञानं करणं गवाद्युपस्थितिर्व्यापारः शाब्दबोधः फलं इति शब्दज्ञानं शाब्दप्रमाकरणं
तेन शाब्दबोधे जननीये हि ज्ञानाकांक्षाज्ञानयोग्यताज्ञानसंनिधिज्ञानतात्पर्य ५
ज्ञानानि सहकारीणि वृत्तिः पदस्यार्थे शक्तिः लक्षणान्यतररूपा शक्तिरिदं पदमिमं
अर्थं बोधयतु इत्याद्याकारा ईश्वरेच्छा सा च शक्तिः शक्तिग्रहं व्याकरणोपमानको

शोभिव्याक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धा
इत्युक्तव्याकरणादिभिर्गृह्यते तथाहि कर्मणि न द्वितीया कर्मरिक्तत कर्तृकरण
योः तृतीया इत्यादिसूत्रैः कर्तृकर्मत्वादौ शक्तिग्रहः उपमानात् शक्तिग्रहस्तूक्त
एव स्वरव्ययमित्यादिना कोशात् स्वर्गादिपदशक्तिग्रहः केचित्तु संस्कृतभाषानभि
ज्ञेन गजवाजिपदादीनि कुत्र शक्तानीति पृष्टे न संस्कृतभाषाभिज्ञेन गजवाजिपदा
दीनि कुत्र शक्तानीति पृष्टेन संस्कृतभाषाभिज्ञेन गजपदं हस्तिवाची शब्दोऽश्ववा
चीत्युक्तात् वाक्यात् शक्तिग्रहः प्रयोजकवृद्धेन गामानयेत्युक्ते तद्वाक्यश्रवणात्प्र
योज्यवृद्धो गामानयेति अत्र कश्चित्प्रयोजकवृद्धवाक्यं श्रुतमेतेन इत्वादिशब्दार्थान
भिज्ञ प्रयोजकवृद्धवाक्यार्थानभिज्ञः प्रयोज्यवृद्धगतव्यापारं दृष्ट्वा तद्व्यापारजनक
प्रवृत्तिमनुमायतत् प्रवृत्तिजनकीभूतं गवानयनेष्टसाधनत्वज्ञानमनुमा
य एतदिष्टसाधनत्वज्ञानं गामानयेति वाक्यजन्यं तदन्वयव्यतिरेकाधीनत्वात्

ति॰
७

इत्यनुमाय एतज्ज्ञानविषयीभूतार्था एतद्वाक्यसंवेद्य एतद्वाक्याधीनज्ञानविषयत्वात्
यन्नैवं तन्नैवं यथा घटमिदीति वाक्यार्थज्ञातं न चेत्ते तथा तस्मात्तथेति इत्यनु
मानेन वाक्यवाक्यार्थयोः संबंधं गृहीत्वा गांवधानाश्वमानयइति प्रयोजकवृद्ध
वाक्यं श्रोतुः प्रयोज्यवृद्धस्य गोविषयनव्यवहारं दृष्ट्वा नयेवमनाआगामितिपदं गोव
मीत्ववाचकं गामितितिपदे स्मिन्नेव गोकर्मत्वबोधनात् अन्यथादर्शनाच्च इत्यनुमाय
तदनंतरं गौर्नीयतां इत्यादिवाक्यस्थलीयप्रयोज्यवृद्धप्रवृत्तिमुपलभ्य उक्तमना आ
गामपदं गोत्वशक्तं गोत्वविशिष्टशक्तं वा तद्बोधकान्वयव्यतिरेकानुविधायित्वात्
इत्येवं प्रकारेण व्यवहाराच्छक्तिग्रहः एवं घटमानयेत्यत्र उक्तमनाज्ञेयं द्वितीयायां क
र्मत्वं धातोरानयनं आख्यातस्य कृतौ लिङादेरिष्टसाधनत्वकृतिसाध्यत्वबलवद
निष्टाननकत्वेषु लोटन्नितिक्वाविषयत्वादौ लट् लटोर्भविष्यत्वादौ लिटः परोक्षत्वे
लङ् लङ्ङ्भूतातीतत्वे लिङ् क्रियायामतिपत्तौ यङ् पौनःपुण्ये क्त प्रत्ययस्य पूर्वका

७

लक्षणेविचलत्त्वम्ः इच्छावतित्वम्ः कर्मणि इच्छायां विशेषणविशेष्यक्रियासंगतैएवका
राणामयोग्यअन्ययोगात्वेनायोगव्यवच्छेदेपुष्पवंशाष्टस्पसाहश्येपप्राग्नुष्पसर्गव्योत्कर्षो
देशशक्तिर्ग्रहोव्यवहाराद्याकरणाद्वाइतिद्रष्टव्यं वशाहंगावोनुधावंतियत्रान्योन्य
धयोग्यायंनेअर्थेनेस्मोदमानानाइवोतिष्टेनेइतिवाक्यशेषात् वराहेशब्दे सूकरे यव
प्रावृष्यदीर्घशूकविशिष्टधान्यशक्तिः पचतीत्यारव्यातस्यपाकेकरोतीतिविवरणाद्य
त्नेशक्तिः सहकारतरौपिकोमधुरंरौतीत्यत्रपिकशब्दस्याम्रवृत्तेमधुरशब्दकर्तृको
लइतिलोकप्रसिद्धेः पिकशब्दस्यकोकिलेशक्तिः लक्षणाशक्यसंबंधः सावजहल्लक्ष
णाजहल्लक्षणाद्विविधावीजं गंगायांघोषइत्यत्रजहल्लक्षणायातीत्यत्रतात्पर्यानुप
पत्तिर्लक्षणावीजं नरुच्चार्यान्वयानुपपत्तिर्वातात्पर्यग्रहस्यप्रकरणादिनाअननितात्वय
वोधकत्वत्वेसतिस्वरूपयोग्यत्वम्आकांक्षाः घटः कर्मत्वमित्यादौनाकांक्षातास्वरूपायोग्य
त्वेपिघटमानयेत्यस्यद्वितीयवारश्रवणवोधजनकत्वा स्वरूपयोग्यत्वेपिघटमानयेत्य

ति ८

स्यद्वितीयवारं अन्वयबोधजनकत्वापत्तेर्नञ्जनितान्वयबोधकत्वात् अर्थाबाधो योग्यता ए
कपदार्थेऽपरपदार्थसंसर्गवत्त्वं तेन वह्निना सिंचति इत्यादौ न योग्यता अन्वयप्रतियोगिप
दार्थानामव्यवधानेनोपस्थितिः आसत्तिः तेन गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यत्र नास
त्तिः नन्वतीकयोर्व्यवहितत्वं तावत्पर्यन्तं ज्ञानं यावदासत्तिः तेन गिरिर्भुक्तमग्निमान्देवद
त्तेनेत्यत्र नासत्तिः नन्वसती हि बोधहेतुः नानार्थस्थलानुरोधात् इत्यवृत्तितानिम-
त्तानुमानोपमानशाब्दाः प्रमाणानि अर्थापत्त्यादीनि अत्रैवान्तर्भवन्तीत्यनवद्य
अद्विजोऽथ मनुस्येव राह्नायेण धीमता रचितं न्यायतिलकं बालबोधशोभित इतिश्री
महुराह्नाचार्यविरचितं न्यायतिलकं संपूर्णम् ॥ ॥

प. ३८